प्राणायामो जपश्चैव प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरित्येते षड़्योगस्य प्रसाधकाः ॥
पापक्षयो देवतानां प्रीतिरिन्द्रियसंयमः ।
मनसः स्थिरता तेभ्यस्तत्त्वालोकश्च सर्व्वदा ॥
गायत्र्या प्रणवेनाथ मात्रया प्राणसंयमः ।
जपध्यानयुतो गर्भस्तेन हीनस्त्वगर्भकः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठश्चतुर्विंशतिमात्रिकः ।
मध्या द्वादशमात्रास्तु ॐकारं सततं जपेत् ॥
श्रुत्वा यथाक्षरं सम्यक् शब्दं गौर्याति संमुखी ।
प्रणवे च क्वते तद्वत् परं ब्रह्म न संशयः ॥
चारके प्रणवे जप्ते परं ब्रह्म प्रसीदति ।
अष्टाक्षरश्च जप्तव्यो गायत्री द्वादशाक्षरा ॥
सर्व्वेषामिन्द्रियाणान्तु प्रवृत्तिर्विषयेषु या ।
निवृत्तिर्मनसा तस्यां प्रत्याहारः प्रकाशितः ॥
इन्द्रियाणीन्द्रियार्थेभ्यः समाहृत्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेण संज्ञितः ॥
प्राणायामैर्द्वादशभिर्यावत् कालकृतो भवेत् ।
यस्तावत् कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ॥
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ।
तुष्टे तु नियतो युक्तः समाधिः सोऽभिधीयते ॥
ध्यायन्न चलते यस्य मनोऽभिध्यायते भृशम् ।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्थिता ।
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तत् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्येयस्तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥
मनः संकल्परहितमिन्द्रियार्थांस्तु चिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥
चित्तस्यास्थिरता भ्रान्तिर्दौर्मनस्यं प्रमादता ।
योगिनां कथिता दोषा योगविघ्नप्रवर्त्तकाः ॥
स्थित्यर्थं मनसः सर्व्वं स्थूलरूपं विचिन्तयेत् ।
तद्गतं निश्चलीभूतं सूक्ष्मस्यं स्थिरतां व्रजेत् ॥
न विना परमात्मानं किञ्चिज्जगति विद्यते ।
विश्वरूपं तमेवेह इति ज्ञात्वा न मुह्यति ॥
ॐकारं परमं ब्रह्म ध्यायेदजस्थितं विभुम् ।
चेत्रचेत्रज्ञरहितं जपेन्मात्रार्थयान्वितम् ॥
हृदि सञ्चिन्तयेत् पूर्व्वं प्रधानं तस्य चोपरि ।
तमो रजस्तथा सत्त्वं मण्डलत्रितयं क्रमात् ॥
कृष्णरक्तसितं तस्मिन् पुरुषं जीवसंज्ञितम् ।
तस्योपरि गुणैश्वर्य्यमष्टपत्रं सरोरुहम् ॥
ज्ञानन्तु कर्णिका तत्र विज्ञानं केशरं स्मृतम् ।
वैराग्यं नालं तत्कन्दो वैष्णवो धर्म्म उत्तमः ॥
कर्णिकायां स्थितं चक्रं जीववन्निश्चलं विभुम् ।
ध्यायेदुरसि संयुक्तमोङ्कारं मुक्तिसाधकम् ॥
व्यक्ताव्यक्ते च पुरुषस्तिस्रो मात्राः प्रकीर्त्तिताः ।
अर्द्धमात्रा परं ब्रह्म ज्ञेयोऽध्यात्मविदुत्तमैः ॥
ध्यायन् यदि त्यजेत् प्राणान् याति ब्रह्मण्य-
सैनिकम् ।
हरिं संस्थाप्य देहेऽन्ते ध्यायन् योगी च
मुक्तिभाक् ॥
आत्मानमात्मना केचित् पश्यन्ति ध्यानचक्षुषः ।
सांख्यबुद्ध्या तथैवान्ये योगेनान्ये तु योगिनः ॥
ब्रह्मप्रकाशकं ज्ञानं भवबन्धविभेदकम् ।
तत्रैकचित्ततायोगो मुक्तिदो नात्र संशयः ॥
जितेन्द्रियान्तःकरणो ज्ञानदृष्टो हि यो भवेत् ।
स मुक्तः कथ्यते योगी परमात्मन्यवस्थितः ॥
आसनस्थानविधयो न योगस्य प्रसाधकाः ।
विलम्बजनकाः सर्व्वे विस्ताराः परिकीर्त्तिताः ॥
शिशुपालः सिद्धिमागात् स्मरणाभ्यासगौरवात् ।
आश्रमाः सर्व्व एवेह पूर्व्वराशे परे तथा ॥
योगाभ्यासं प्रकुर्व्वन्तः पश्यन्त्यात्मानमात्मना ।
सर्व्वभूतेषु कारुण्यं विद्वेषं विषयेषु च ॥
गुप्तशिश्नोदरादिश्च कुर्व्वन् योगी विमुच्यते ।
इन्द्रियैरिन्द्रियार्थांस्तु न जानाति नरो यदा ॥
काष्ठवत् ब्रह्मसंलीनो योगयुक्तस्तदा भवेत् ॥
सर्व्वे वर्णाः स्त्रियः सर्व्वाः कृत्वा पापानि
भस्मसात् ।
ध्यानाग्निनामलाः सन्तो लभन्ते परमां गतिम् ।
मथनात् दृश्यते वह्निस्तद्वत् ध्यानेन वै हरिः ॥
ब्रह्मात्मनोर्यदेकत्वं स योगश्चोत्तमोत्तमः ॥
बाह्यैरुपायैर्मुक्तिर्न नान्तःस्थैः स्यादुयमादिभिः ।
सांख्यज्ञानेन योगेन वेदान्तश्रवणेन च ।
प्रत्यक्तात्मनो या हि सा मुक्तिरभिधीयते ॥
अनात्मन्यात्मरूपत्वमसतः सत्स्वरूपता ।
दुःखाभावे तथा सौख्यं माया विद्याविना-
शिनी ॥”
इति गारुड़े ब्रह्मज्ञाने २४० अध्यायः ॥

ब्रह्मज्ञानी, त्रि, (ब्रह्मज्ञानं विद्यतेऽस्य । ब्रह्म-
ज्ञान + इन् ।) ब्रह्मज्ञानविशिष्टः । यथा,—
“कुशलाकुशलारत्तिरहितः समदर्शकः ।
लिङ्गाश्रमपरित्यागी ब्रह्मज्ञानी निगद्यते ॥”
इति शङ्करानन्ददीपिका ॥
तेनापि कृष्णभक्तिः कर्त्तव्या । यथा,—
ब्रह्मानन्देन पूर्णोऽहं तेनानन्देन पूर्णधीः ।
तथापि शून्यमात्मानं मन्ये कृष्णरतिं विना ॥”
इति पाद्मे पातालखण्डे जावालिं प्रति ब्रह्म-
विद्यावचनम् ॥

ब्रह्मण्यः, पुं, (ब्रह्मणे हितः । ब्रह्मन् + “खलयव-
माषतिलवृषब्रह्मणश्च ।” ५ । १ । ७ । इति यत् ।
“ये चाभावकर्म्मणोः ।” ६ । ४ । १६८ । इत्यन्-
प्रकृत्या ।) विष्णुः । यथा, महाभारते १३ ।
१४६ । ८३ ।
“ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥”
अपि च ।
“ब्रह्मण्यो देवकीपुत्त्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥”
इत्याह्निकचन्द्रिका ॥
ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४१ ॥ मुञ्ज-
तृणम् । तूलवृक्षः । इति राजनिर्घण्टः ॥
शनैश्चरः । (स्त्री । दुर्गा । यथा महाभा-
रते ६ । २२ । २६ ।
“वेदश्रुतिमहापुण्ये ब्रह्मण्ये जातवेदसि ।
जम्बूकटकचैत्येषु नित्यं सन्निहितालये ॥”)
ब्रह्मणि साधौ त्रि । इति मेदिनी । ये, ६६ ॥

ब्रह्मण्यदेवः, पुं, (ब्रह्मण्यो देवः ।) श्रीकृष्णः ।
यथा,—
“नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥”
इति नारदीयपुराणम् ॥
(यथा च भागवते । ४ । २१ । ३७ ।
“ब्रह्मण्यदेवः पुरुषः पुरातनो
नित्यं हरिर्यच्चरणाभिवन्दनात् ॥”)

ब्रह्मतालः, पुं, चतुर्मुखतालः । स तु, दशताला-
त्मकः । तत्र ७ मात्राः । मात्रा तु, क च ट
त प इति पञ्चाक्षराणामुच्चारणकालः । सैव
लघुमात्रा । तदर्द्धं द्रुतमात्रा । तन्मध्ये ४
लघवः ६ द्रुताः । ० । ०० । ००० । यथा,—
“चतुर्मुखाभिधे ताले जगणानन्तरं प्लुतः ॥”
इति सङ्गीतदामोदरः ॥

ब्रह्मतीर्थं, क्ली, (ब्रह्मणस्तीर्थम् ।) पुष्करमूलम् ।
इति राजनिर्घण्टः ॥ पुष्करतीर्थञ्च ॥ (तत्र
स्नानफलम् । यथा, महाभारते । ३ । ८३ ।
१०५ ।
“ततो गच्छेत राजेन्द्र ! ब्रह्मणस्तीर्थमुत्तमम् ।
तत्र वर्णावरः स्नात्वा ब्राह्मण्यं लभते नरः ।
ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम् ॥”)

ब्रह्मत्वं, क्ली, ब्रह्मणो भावः । (“ब्रह्मणस्त्वः ।” ५ ।
१ । १३६ । इति त्वः ।) तत्पर्य्यायः । ब्रह्मभूयम्
२ ब्रह्मसायुज्यम् ३ । इत्यमरः । २ । ७ । ५२ ।
ब्रह्मसायूज्यम् ४ । इति शब्दरत्नावली ॥ (यथा,
मार्कण्डेये । ५७ । ६० ।
“ब्रह्मत्वममरेशत्वं देवत्वं मरुतस्तथा ॥”)

ब्रह्मदण्डः, पुं, (ब्रह्मणो ब्राह्मणस्य दण्डः सिद्ध-
यष्टिः ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥
वशिष्ठस्य सिद्धयष्टिः । यथा,—
“धिग्बलं क्षत्त्रियबलं ब्रह्मतेजो बलं बलम् ।
एकेन ब्रह्मदण्डेन बहवो नाशिता मम ॥”
इति रामायणे विश्वामित्रवाक्यम् ॥
(ब्रह्मणो ब्राह्मणस्य शापरूपो दण्डः ।) ब्रह्म-
शापः । यथा,—
“ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥”
इति तिथ्यादितत्त्वम् ॥
(अयं हि राजधर्म्मे शत्रुनाशनोपायः । यदुक्तं
महाभारते । २ । ५ । १२३ ।
“कच्चिदङ्गानि सर्व्वाणि ब्रह्मदण्डस्य तेऽनघ ! ।
विषयोगास्तथा सर्व्वे विदिताः शत्रुनाशनाः ॥”)

ब्रह्मदण्डी, स्त्री, (ब्रह्मणे ब्रह्मोपासनार्थं दण्डो
यस्या इव दण्डः ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः ।
अजदण्डी २ कण्टपत्रफला ३ । अस्या गुणाः ।
कटुत्वम् । उष्णत्वम् । कफशोफानिलापहत्वञ्च ।